श्री कृष्णाष्टकं

श्री कृष्णाष्टकं

वसुदेवसुतं देवं कंसचाणूरमर्दनं |
देवकीपरमानंदं कृष्णं वंदे जगद्गुरुं || 1 ||

अतसीपुष्पसंकाशं हारनूपुरशोभितं |
रत्नकंकणकेयूरं कृष्णं वंदे जगद्गुरुं || 2 ||

कुटिलालकसंयुक्तं पूर्णचंद्रनिभाननं |
विलसत्कुंडलधरं कृष्णं वंदे जगद्गुरुं || 3 ||

मंदारगंधसंयुक्तं चारुहासं चतुर्भुजं |
बर्हिपिंछावचूडांगं कृष्णं वंदे जगद्गुरुं || 4 ||

उत्फुल्लपद्मपत्राक्षं नीलजीमूतसन्निभं |
यादवानां शिरोरत्नं कृष्णं वंदे जगद्गुरुं || 5 ||

रुक्मिणीकेळिसंयुक्तं पीतांबरसुशोभितं |
अवाप्ततुलसीगंधं कृष्णं वंदे जगद्गुरुं || 6 ||

गोपिकानां कुचद्वंद्वकुंकुमांकितवक्षसं |
श्रीनिकेतं महेष्वासं कृष्णं वंदे जगद्गुरुं || 7 ||

श्रीवत्सांकं महोरस्कं वनमालाविराजितं |
शंखचक्रधरं देवं कृष्णं वंदे जगद्गुरुं || 8 ||

कृष्णाष्टकमिदं पुण्यं प्रातरुत्थाय यः पठेत् |
कोटिजन्मकृतं पापं स्मरणेन विनश्यति || 9 ||

इति श्री कृष्णाष्टकं ||